# Avadhuta Gitam from Shrimad Bhagavata

# અવધૂતગીતં શ્રીમદ્ભાગવતાન્તર્ગતમ્

## Document Information

Text title : Avadhutagitam from Shrimad Bhagavata

File name : avadhUtagItam.itx

Category : gItam, giitaa, vyAsa

Location : doc_giitaa

Author : Vyasa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, PSA Easwaran

Description-comments : Bhagavatam, Portion of adhyAya 7, and 8 and 9 of uddhavagItA

Source : Bhagavatam

Latest update : December 30, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અવધૂતગીતં શ્રીમદ્ભાગવતાન્તર્ગતમ્

## અધ્યાયઃ ૧૧.૭

અથ અવધૂતગીતમ્ ।
॥ ૐ નમો ભગવતે વાસુદેવાય ॥

અવધૂતં દ્વિજં કઞ્ચિચ્ચરન્તમકુતોભયમ્ ।
કવિં નિરીક્ષ્ય તરુણં યદુઃ પપ્રચ્છ ધર્મવિત્ ॥ ૨૫॥

યદુરુવાચ -
કુતો બુદ્ધિરિયં બ્રહ્મન્નકર્તુઃ સુવિશારદા ।
યામાસાદ્ય ભવાઁલ્લોકં વિદ્વાંશ્ચરતિ બાલવત્ ॥ ૨૬॥

પ્રાયો ધર્માર્થકામેષુ વિવિત્સાયાં ચ માનવાઃ ।
હેતુનૈવ સમીહન્તે આયુષો યશસઃ શ્રિયઃ ॥ ૨૭॥

ત્વં તુ કલ્પઃ કવિર્દક્ષઃ સુભગોઽમૃતભાષણઃ ।
ન કર્તા નેહસે કિઞ્ચિજ્જડોન્મત્તપિશાચવત્ ॥ ૨૮॥

જનેષુ દહ્યમાનેષુ કામલોભદવાગ્નિના ।
ન તપ્યસેઽગ્નિના મુક્તો ગઙ્ગામ્ભઃસ્થ ઇવ દ્વિપઃ ॥ ૨૯॥

ત્વં હિ નઃ પૃચ્છતાં બ્રહ્મન્નાત્મન્યાનન્દકારણમ્ ।
બ્રૂહિ સ્પર્શવિહીનસ્ય ભવતઃ કેવલાત્મનઃ ॥ ૩૦॥

શ્રીભગવાનુવાચ -
યદુનૈવં મહાભાગો બ્રહ્મણ્યેન સુમેધસા ।
પૃષ્ટઃ સભાજિતઃ પ્રાહ પ્રશ્રયાવનતં દ્વિજઃ ॥ ૩૧॥

બ્રાહ્મણ ઉવાચ -
સન્તિ મે ગુરવો રાજન્ બહવો બુદ્ધ્યુપાશ્રિતાઃ ।
યતો બુદ્ધિમુપાદાય મુક્તોઽટામીહ તાન્ શ‍ૃણુ ॥ ૩૨॥

પૃથિવી વાયુરાકાશમાપોઽગ્નિશ્ચન્દ્રમા રવિઃ ।
કપોતોઽજગરઃ સિન્ધુઃ પતઙ્ગો મધુકૃદ્ગજઃ ॥ ૩૩॥

મધુહા હરિણો મીનઃ પિઙ્ગલા કુરરોઽર્ભકઃ ।
કુમારી શરકૃત્સર્પ ઊર્ણનાભિઃ સુપેશકૃત્ ॥ ૩૪॥

એતે મે ગુરવો રાજન્ ચતુર્વિંશતિરાશ્રિતાઃ ।
શિક્ષા વૃત્તિભિરેતેષામન્વશિક્ષમિહાત્મનઃ ॥ ૩૫॥

યતો યદનુશિક્ષામિ યથા વા નાહુષાત્મજ ।
તત્તથા પુરુષવ્યાઘ્ર નિબોધ કથયામિ તે ॥ ૩૬॥

ભૂતૈરાક્રમ્યમાણોઽપિ ધીરો દૈવવશાનુગૈઃ ।
તદ્વિદ્વાન્ન ચલેન્માર્ગાદન્વશિક્ષં ક્ષિતેર્વ્રતમ્ ॥ ૩૭॥

શશ્વત્પરાર્થસર્વેહઃ પરાર્થૈકાન્તસમ્ભવઃ ।
સાધુઃ શિક્ષેત ભૂભૃત્તો નગશિષ્યઃ પરાત્મતામ્ ॥ ૩૮॥

પ્રાણવૃત્ત્યૈવ સન્તુષ્યેન્મુનિર્નૈવેન્દ્રિયપ્રિયૈઃ ।
જ્ઞાનં યથા ન નશ્યેત નાવકીર્યેત વાઙ્મનઃ ॥ ૩૯॥

વિષયેષ્વાવિશન્ યોગી નાનાધર્મેષુ સર્વતઃ ।
ગુણદોષવ્યપેતાત્મા ન વિષજ્જેત વાયુવત્ ॥ ૪૦॥

પાર્થિવેષ્વિહ દેહેષુ પ્રવિષ્ટસ્તદ્ગુણાશ્રયઃ ।
ગુણૈર્ન યુજ્યતે યોગી ગન્ધૈર્વાયુરિવાત્મદૃક્ ॥ ૪૧॥

અન્તર્હિતશ્ચ સ્થિરજઙ્ગમેષુ બ્રહ્માત્મભાવેન સમન્વયેન ।
વ્યાપ્ત્યાવ્યવચ્છેદમસઙ્ગમાત્મનો મુનિર્નભસ્ત્વં વિતતસ્ય ભાવયેત્ ॥ ૪૨॥

તેજોઽબન્નમયૈર્ભાવૈર્મેઘાદ્યૈર્વાયુનેરિતૈઃ ।
ન સ્પૃશ્યતે નભસ્તદ્વત્કાલસૃષ્ટૈર્ગુણૈઃ પુમાન્ ॥ ૪૩॥

સ્વચ્છઃ પ્રકૃતિતઃ સ્નિગ્ધો માધુર્યસ્તીર્થભૂર્નૃણામ્ ।
મુનિઃ પુનાત્યપાં મિત્રમીક્ષોપસ્પર્શકીર્તનૈઃ ॥ ૪૪॥

તેજસ્વી તપસા દીપ્તો દુર્ધર્ષોદરભાજનઃ ।
સર્વભક્ષોઽપિ યુક્તાત્મા નાદત્તે મલમગ્નિવત્ ॥ ૪૫॥

ક્વચિચ્છન્નઃ ક્વચિત્સ્પષ્ટ ઉપાસ્યઃ શ્રેય ઇચ્છતામ્ ।
ભુઙ્ક્તે સર્વત્ર દાતૃણાં દહન્ પ્રાગુત્તરાશુભમ્ ॥ ૪૬॥

સ્વમાયયા સૃષ્ટમિદં સદસલ્લક્ષણં વિભુઃ ।
પ્રવિષ્ટ ઈયતે તત્તત્સ્વરૂપોઽગ્નિરિવૈધસિ ॥ ૪૭॥

વિસર્ગાદ્યાઃ શ્મશાનાન્તા ભાવા દેહસ્ય નાત્મનઃ ।
કલાનામિવ ચન્દ્રસ્ય કાલેનાવ્યક્તવર્ત્મના ॥ ૪૮॥

કાલેન હ્યોઘવેગેન ભૂતાનાં પ્રભવાપ્યયૌ ।
નિત્યાવપિ ન દૃશ્યેતે આત્મનોઽગ્નેર્યથાર્ચિષામ્ ॥ ૪૯॥

ગુણૈર્ગુણાનુપાદત્તે યથાકાલં વિમુઞ્ચતિ ।
ન તેષુ યુજ્યતે યોગી ગોભિર્ગા ઇવ ગોપતિઃ ॥ ૫૦॥

બુધ્યતે સ્વે ન ભેદેન વ્યક્તિસ્થ ઇવ તદ્ગતઃ ।
લક્ષ્યતે સ્થૂલમતિભિરાત્મા ચાવસ્થિતોઽર્કવત્ ॥ ૫૧॥

નાતિસ્નેહઃ પ્રસઙ્ગો વા કર્તવ્યઃ ક્વાપિ કેનચિત્ ।
કુર્વન્ વિન્દેત સન્તાપં કપોત ઇવ દીનધીઃ ॥ ૫૨॥

કપોતઃ કશ્ચનારણ્યે કૃતનીડો વનસ્પતૌ ।
કપોત્યા ભાર્યયા સાર્ધમુવાસ કતિચિત્સમાઃ ॥ ૫૩॥

કપોતૌ સ્નેહગુણિતહૃદયૌ ગૃહધર્મિણૌ ।
દૃષ્ટિં દૃષ્ટ્યાઙ્ગમઙ્ગેન બુદ્ધિં બુદ્ધ્યા બબન્ધતુઃ ॥ ૫૪॥

શય્યાસનાટનસ્થાનવાર્તાક્રીડાશનાદિકમ્ ।
મિથુનીભૂય વિશ્રબ્ધૌ ચેરતુર્વનરાજિષુ ॥ ૫૫॥

યં યં વાઞ્છતિ સા રાજન્ તર્પયન્ત્યનુકમ્પિતા ।
તં તં સમનયત્કામં કૃચ્છ્રેણાપ્યજિતેન્દ્રિયઃ ॥ ૫૬॥

કપોતી પ્રથમં ગર્ભં ગૃહ્ણતી કાલ આગતે ।
અણ્ડાનિ સુષુવે નીડે સ્વપત્યુઃ સન્નિધૌ સતી ॥ ૫૭॥

તેષુ કાલે વ્યજાયન્ત રચિતાવયવા હરેઃ ।
શક્તિભિર્દુર્વિભાવ્યાભિઃ કોમલાઙ્ગતનૂરુહાઃ ॥ ૫૮॥

પ્રજાઃ પુપુષતુઃ પ્રીતૌ દમ્પતી પુત્રવત્સલૌ ।
શૃણ્વન્તૌ કૂજિતં તાસાં નિર્વૃતૌ કલભાષિતૈઃ ॥ ૫૯॥

તાસાં પતત્રૈઃ સુસ્પર્શૈઃ કૂજિતૈર્મુગ્ધચેષ્ટિતૈઃ ।

પ્રત્યુદ્ગમૈરદીનાનાં પિતરૌ મુદમાપતુઃ ॥ ૬૦॥

સ્નેહાનુબદ્ધહૃદયાવન્યોન્યં વિષ્ણુમાયયા ।
વિમોહિતૌ દીનધિયૌ શિશૂન્ પુપુષતુઃ પ્રજાઃ ॥ ૬૧॥

એકદા જગ્મતુસ્તાસામન્નાર્થં તૌ કુટુમ્બિનૌ ।
પરિતઃ કાનને તસ્મિન્નર્થિનૌ ચેરતુશ્ચિરમ્ ॥ ૬૨॥

દૃષ્ટ્વા તાન્ લુબ્ધકઃ કશ્ચિદ્યદૃચ્છાતો વનેચરઃ ।
જગૃહે જાલમાતત્ય ચરતઃ સ્વાલયાન્તિકે ॥ ૬૩॥

કપોતશ્ચ કપોતી ચ પ્રજાપોષે સદોત્સુકૌ ।
ગતૌ પોષણમાદાય સ્વનીડમુપજગ્મતુઃ ॥ ૬૪॥

કપોતી સ્વાત્મજાન્ વીક્ષ્ય બાલકાન્ જાલસંવૃતાન્ ।
તાનભ્યધાવત્ક્રોશન્તી ક્રોશતો ભૃશદુઃખિતા ॥ ૬૫॥

સાસકૃત્સ્નેહગુણિતા દીનચિત્તાજમાયયા ।
સ્વયં ચાબધ્યત શિચા બદ્ધાન્ પશ્યન્ત્યપસ્મૃતિઃ ॥ ૬૬॥

કપોતશ્ચાત્મજાન્ બદ્ધાનાત્મનોઽપ્યધિકાન્ પ્રિયાન્ ।
ભાર્યાં ચાત્મસમાં દીનો વિલલાપાતિદુઃખિતઃ ॥ ૬૭॥

અહો મે પશ્યતાપાયમલ્પપુણ્યસ્ય દુર્મતેઃ ।
અતૃપ્તસ્યાકૃતાર્થસ્ય ગૃહસ્ત્રૈવર્ગિકો હતઃ ॥ ૬૮॥

અનુરૂપાનુકૂલા ચ યસ્ય મે પતિદેવતા ।
શૂન્યે ગૃહે માં સન્ત્યજ્ય પુત્રૈઃ સ્વર્યાતિ સાધુભિઃ ॥ ૬૯॥

સોઽહં શૂન્યે ગૃહે દીનો મૃતદારો મૃતપ્રજઃ ।
જિજીવિષે કિમર્થં વા વિધુરો દુઃખજીવિતઃ ॥ ૭૦॥

તાંસ્તથૈવાવૃતાન્ શિગ્ભિર્મૃત્યુગ્રસ્તાન્ વિચેષ્ટતઃ ।
સ્વયં ચ કૃપણઃ શિક્ષુ પશ્યન્નપ્યબુધોઽપતત્ ॥ ૭૧॥

તં લબ્ધ્વા લુબ્ધકઃ ક્રૂરઃ કપોતં ગૃહમેધિનમ્ ।
કપોતકાન્ કપોતીં ચ સિદ્ધાર્થઃ પ્રયયૌ ગૃહમ્ ॥ ૭૨॥

એવં કુટુમ્બ્યશાન્તાત્મા દ્વન્દ્વારામઃ પતત્રિવત્ ।
પુષ્ણન્ કુટુમ્બં કૃપણઃ સાનુબન્ધોઽવસીદતિ ॥ ૭૩॥

યઃ પ્રાપ્ય માનુષં લોકં મુક્તિદ્વારમપાવૃતમ્ ।
ગૃહેષુ ખગવત્સક્તસ્તમારૂઢચ્યુતં વિદુઃ ॥ ૭૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે સપ્તમોઽધ્યાયઃ ॥ ૭॥

## અષ્ટમોઽધ્યાયઃ - ૧૧.૮

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

બ્રાહ્મણ ઉવાચ -
સુખમૈન્દ્રિયકં રાજન્ સ્વર્ગે નરક એવ ચ ।
દેહિનાં યદ્યથા દુઃખં તસ્માન્નેચ્છેત તદ્બુધઃ ॥ ૧॥

ગ્રાસં સુમૃષ્ટં વિરસં મહાન્તં સ્તોકમેવ વા ।
યદૃચ્છયૈવાપતિતં ગ્રસેદાજગરોઽક્રિયઃ ॥ ૨॥

શયીતાહાનિ ભૂરીણિ નિરાહારોઽનુપક્રમઃ ।
યદિ નોપનમેદ્ગ્રાસો મહાહિરિવ દિષ્ટભુક્ ॥ ૩॥

ઓજઃ સહો બલયુતં બિભ્રદ્દેહમકર્મકમ્ ।
શયાનો વીતનિદ્રશ્ચ નેહેતેન્દ્રિયવાનપિ ॥ ૪॥

મુનિઃ પ્રસન્નગમ્ભીરો દુર્વિગાહ્યો દુરત્યયઃ ।
અનન્તપારો હ્યક્ષોભ્યઃ સ્તિમિતોદ ઇવાર્ણવઃ ॥ ૫॥

સમૃદ્ધકામો હીનો વા નારાયણપરો મુનિઃ ।
નોત્સર્પેત ન શુષ્યેત સરિદ્ભિરિવ સાગરઃ ॥ ૬॥

દૃષ્ટ્વા સ્ત્રિયં દેવમાયાં તદ્ભાવૈરજિતેન્દ્રિયઃ ।
પ્રલોભિતઃ પતત્યન્ધે તમસ્યગ્નૌ પતઙ્ગવત્ ॥ ૭॥

યોષિદ્ધિરણ્યાભરણામ્બરાદિદ્રવ્યેષુ માયારચિતેષુ મૂઢઃ ।
પ્રલોભિતાત્મા હ્યુપભોગબુદ્ધ્યા પતઙ્ગવન્નશ્યતિ નષ્ટદૃષ્ટિઃ ॥ ૮॥

સ્તોકં સ્તોકં ગ્રસેદ્ગ્રાસં દેહો વર્તેત યાવતા ।
ગૃહાનહિંસન્નાતિષ્ઠેદ્વૃત્તિં માધુકરીં મુનિઃ ॥ ૯॥

અણુભ્યશ્ચ મહદ્ભ્યશ્ચ શાસ્ત્રેભ્યઃ કુશલો નરઃ ।
સર્વતઃ સારમાદદ્યાત્પુષ્પેભ્ય ઇવ ષટ્પદઃ ॥ ૧૦॥

સાયન્તનં શ્વસ્તનં વા ન સઙ્ગૃહ્ણીત ભિક્ષિતમ્ ।
પાણિપાત્રોદરામત્રો મક્ષિકેવ ન સઙ્ગ્રહી ॥ ૧૧॥

સાયન્તનં શ્વસ્તનં વા ન સઙ્ગૃહ્ણીત ભિક્ષુકઃ ।
મક્ષિકા ઇવ સઙ્ગૃહ્ણન્ સહ તેન વિનશ્યતિ ॥ ૧૨॥

પદાપિ યુવતીં ભિક્ષુર્ન સ્પૃશેદ્દારવીમપિ ।
સ્પૃશન્ કરીવ બધ્યેત કરિણ્યા અઙ્ગસઙ્ગતઃ ॥ ૧૩॥

નાધિગચ્છેત્સ્ત્રિયં પ્રાજ્ઞઃ કર્હિચિન્મૃત્યુમાત્મનઃ ।
બલાધિકૈઃ સ હન્યેત ગજૈરન્યૈર્ગજો યથા ॥ ૧૪॥

ન દેયં નોપભોગ્યં ચ લુબ્ધૈર્યદ્દુઃખસઞ્ચિતમ્ ।
ભુઙ્ક્તે તદપિ તચ્ચાન્યો મધુહેવાર્થવિન્મધુ ॥ ૧૫॥

સુદુઃખોપાર્જિતૈર્વિત્તૈરાશાસાનાં ગૃહાશિષઃ ।
મધુહેવાગ્રતો ભુઙ્ક્તે યતિર્વૈ ગૃહમેધિનામ્ ॥ ૧૬॥

ગ્રામ્યગીતં ન શ‌ૃણુયાદ્યતિર્વનચરઃ ક્વચિત્ ।
શિક્ષેત હરિણાદ્બદ્ધાન્મૃગયોર્ગીતમોહિતાત્ ॥ ૧૭॥

નૃત્યવાદિત્રગીતાનિ જુષન્ ગ્રામ્યાણિ યોષિતામ્ ।
આસાં ક્રીડનકો વશ્ય ઋષ્યશ‌ૃઙ્ગો મૃગીસુતઃ ॥ ૧૮॥

જિહ્વયાતિપ્રમાથિન્યા જનો રસવિમોહિતઃ ।
મૃત્યુમૃચ્છત્યસદ્બુદ્ધિર્મીનસ્તુ બડિશૈર્યથા ॥ ૧૯॥

ઇન્દ્રિયાણિ જયન્ત્યાશુ નિરાહારા મનીષિણઃ ।
વર્જયિત્વા તુ રસનં તન્નિરન્નસ્ય વર્ધતે ॥ ૨૦॥

તાવજ્જિતેન્દ્રિયો ન સ્યાદ્વિજિતાન્યેન્દ્રિયઃ પુમાન્ ।
ન જયેદ્રસનં યાવજ્જિતં સર્વં જિતે રસે ॥ ૨૧॥

પિઙ્ગલા નામ વેશ્યાઽઽસીદ્વિદેહનગરે પુરા ।
તસ્યા મે શિક્ષિતં કિઞ્ચિન્નિબોધ નૃપનન્દન ॥ ૨૨॥

સા સ્વૈરિણ્યેકદા કાન્તં સઙ્કેત ઉપનેષ્યતી ।
અભૂત્કાલે બહિર્દ્વારિ બિભ્રતી રૂપમુત્તમમ્ ॥ ૨૩॥

માર્ગ આગચ્છતો વીક્ષ્ય પુરુષાન્ પુરુષર્ષભ ।

તાન્ શુલ્કદાન્ વિત્તવતઃ કાન્તાન્ મેનેઽર્થકામુકા ॥ ૨૪॥

આગતેષ્વપયાતેષુ સા સઙ્કેતોપજીવિની ।
અપ્યન્યો વિત્તવાન્ કોઽપિ મામુપૈષ્યતિ ભૂરિદઃ ॥ ૨૫॥

એવં દુરાશયા ધ્વસ્તનિદ્રા દ્વાર્યવલમ્બતી ।
નિર્ગચ્છન્તી પ્રવિશતી નિશીથં સમપદ્યત ॥ ૨૬॥

તસ્યા વિત્તાશયા શુષ્યદ્વક્ત્રાયા દીનચેતસઃ ।
નિર્વેદઃ પરમો જજ્ઞે ચિન્તાહેતુઃ સુખાવહઃ ॥ ૨૭॥

તસ્યા નિર્વિણ્ણચિત્તાયા ગીતં શૃણુ યથા મમ ।
નિર્વેદ આશાપાશાનાં પુરુષસ્ય યથા હ્યસિઃ ॥ ૨૮॥

ન હ્યઙ્ગાજાતનિર્વેદો દેહબન્ધં જિહાસતિ ।
યથા વિજ્ઞાનરહિતો મનુજો મમતાં નૃપ ॥ ૨૯॥

પિઙ્ગલોવાચ -
અહો મે મોહવિતતિં પશ્યતાવિજિતાત્મનઃ ।
યા કાન્તાદસતઃ કામં કામયે યેન બાલિશા ॥ ૩૦॥

સન્તં સમીપે રમણં રતિપ્રદં વિત્તપ્રદં નિત્યમિમં વિહાય ।
અકામદં દુઃખભયાધિશોકમોહપ્રદં તુચ્છમહં ભજેઽજ્ઞા ॥ ૩૧॥

અહો મયાઽઽત્મા પરિતાપિતો વૃથા સાઙ્કેત્યવૃત્ત્યાતિવિગર્હ્યવાર્તયા ।
સ્ત્રૈણાન્નરાદ્યાર્થતૃષોઽનુશોચ્યાત્ ક્રીતેન વિત્તં રતિમાત્મનેચ્છતી ॥ ૩૨॥

યદસ્થિભિર્નિર્મિતવંશવંશ્યસ્થૂણં ત્વચા રોમનખૈઃ પિનદ્ધમ્ ।
ક્ષરન્નવદ્વારમગારમેતદ્વિણ્મૂત્રપૂર્ણં મદુપૈતિ કાન્યા ॥ ૩૩॥

વિદેહાનાં પુરે હ્યસ્મિન્નહમેકૈવ મૂઢધીઃ ।
યાન્યમિચ્છન્ત્યસત્યસ્માદાત્મદાત્કામમચ્યુતાત્ ॥ ૩૪॥

સુહૃત્પ્રેષ્ઠતમો નાથ આત્મા ચાયં શરીરિણામ્ ।
તં વિક્રીયાત્મનૈવાહં રમેઽનેન યથા રમા ॥ ૩૫॥

કિયત્પ્રિયં તે વ્યભજન્ કામા યે કામદા નરાઃ ।
આદ્યન્તવન્તો ભાર્યાયા દેવા વા કાલવિદ્રુતાઃ ॥ ૩૬॥

નૂનં મે ભગવાન્ પ્રીતો વિષ્ણુઃ કેનાપિ કર્મણા ।
નિર્વેદોઽયં દુરાશાયા યન્મે જાતઃ સુખાવહઃ ॥ ૩૭॥

મૈવં સ્યુર્મન્દભાગ્યાયાઃ ક્લેશા નિર્વેદહેતવઃ ।
યેનાનુબન્ધં નિર્હૃત્ય પુરુષઃ શમમૃચ્છતિ ॥ ૩૮॥

તેનોપકૃતમાદાય શિરસા ગ્રામ્યસઙ્ગતાઃ ।
ત્યક્ત્વા દુરાશાઃ શરણં વ્રજામિ તમધીશ્વરમ્ ॥ ૩૯॥

સન્તુષ્ટા શ્રદ્દધત્યેતદ્યથા લાભેન જીવતી ।
વિહરામ્યમુનૈવાહમાત્મના રમણેન વૈ ॥ ૪૦॥

સંસારકૂપે પતિતં વિષયૈર્મુષિતેક્ષણમ્ ।
ગ્રસ્તં કાલાહિનાઽઽત્માનં કોઽન્યસ્ત્રાતુમધીશ્વરઃ ॥ ૪૧॥

આત્મૈવ હ્યાત્મનો ગોપ્તા નિર્વિદ્યેત યદાખિલાત્ ।
અપ્રમત્ત ઇદં પશ્યેદ્ગ્રસ્તં કાલાહિના જગત્ ॥ ૪૨॥

બ્રાહ્મણ ઉવાચ -
એવં વ્યવસિતમતિર્દુરાશાં કાન્તતર્ષજામ્ ।
છિત્ત્વોપશમમાસ્થાય શય્યામુપવિવેશ સા ॥ ૪૩॥

આશા હિ પરમં દુઃખં નૈરાશ્યં પરમં સુખમ્ ।
યથા સઞ્છિદ્ય કાન્તાશાં સુખં સુષ્વાપ પિઙ્ગલા ॥ ૪૪॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે અષ્ટમોઽધ્યાયઃ ॥ ૮॥

## નવમોઽધ્યાયઃ - ૧૧.૯

॥ ૐ નમો ભગવતે વાસુદેવાય ॥

બ્રાહ્મણ ઉવાચ -
પરિગ્રહો હિ દુઃખાય યદ્યત્પ્રિયતમં નૃણામ્ ।
અનન્તં સુખમાપ્નોતિ તદ્વિદ્વાન્યસ્ત્વકિઞ્ચનઃ ॥ ૧॥

સામિષં કુરરં જઘ્નુર્બલિનો યે નિરામિષાઃ ।
તદામિષં પરિત્યજ્ય સ સુખં સમવિન્દત ॥ ૨॥

ન મે માનાવમાનૌ સ્તો ન ચિન્તા ગેહપુત્રિણામ્ ।
આત્મક્રીડ આત્મરતિર્વિચરામીહ બાલવત્ ॥ ૩॥

દ્વાવેવ ચિન્તયા મુક્તૌ પરમાનન્દ આપ્લુતૌ ।
યો વિમુગ્ધો જડો બાલો યો ગુણેભ્યઃ પરં ગતઃ ॥ ૪॥

ક્વચિત્કુમારી ત્વાત્માનં વૃણાનાન્ ગૃહમાગતાન્ ।
સ્વયં તાનર્હયામાસ ક્વાપિ યાતેષુ બન્ધુષુ ॥ ૫॥

તેષામભ્યવહારાર્થં શાલીન્ રહસિ પાર્થિવ ।
અવઘ્નન્ત્યાઃ પ્રકોષ્ઠસ્થાશ્ચક્રુઃ શઙ્ખાઃ સ્વનં મહત્ ॥ ૬॥

સા તજ્જુગુપ્સિતં મત્વા મહતી વ્રીડિતા તતઃ ।
બભઞ્જૈકૈકશઃ શઙ્ખાન્ દ્વૌ દ્વૌ પાણ્યોરશેષયત્ ॥ ૭॥

ઉભયોરપ્યભૂદ્ઘોષો હ્યવઘ્નન્ત્યાઃ સ્મ શઙ્ખયોઃ ।
તત્રાપ્યેકં નિરભિદદેકસ્માન્નાભવદ્ધ્વનિઃ ॥ ૮॥

અન્વશિક્ષમિમં તસ્યા ઉપદેશમરિન્દમ ।
લોકાનનુચરન્નેતાન્ લોકતત્ત્વવિવિત્સયા ॥ ૯॥

વાસે બહૂનાં કલહો ભવેદ્વાર્તા દ્વયોરપિ ।
એક એવ ચરેત્તસ્માત્કુમાર્યા ઇવ કઙ્કણઃ ॥ ૧૦॥

મન એકત્ર સંયુઞ્જ્યાજ્જિતશ્વાસો જિતાસનઃ ।
વૈરાગ્યાભ્યાસયોગેન ધ્રિયમાણમતન્દ્રિતઃ ॥ ૧૧॥

યસ્મિન્ મનો લબ્ધપદં યદેત-
ચ્છનૈઃ શનૈર્મુઞ્ચતિ કર્મરેણૂન્ ।
સત્ત્વેન વૃદ્ધેન રજસ્તમશ્ચ
વિધૂય નિર્વાણમુપૈત્યનિન્ધનમ્ ॥ ૧૨॥

તદૈવમાત્મન્યવરુદ્ધચિત્તો
ન વેદ કિઞ્ચિદ્બહિરન્તરં વા ।
યથેષુકારો નૃપતિં વ્રજન્ત-
મિષૌ ગતાત્મા ન દદર્શ પાર્શ્વે ॥ ૧૩॥

એકચાર્યનિકેતઃ સ્યાદપ્રમત્તો ગુહાશયઃ ।
અલક્ષ્યમાણ આચારૈર્મુનિરેકોઽલ્પભાષણઃ ॥ ૧૪॥

ગૃહારમ્ભોઽતિ દુઃખાય વિફલશ્ચાધ્રુવાત્મનઃ ।
સર્પઃ પરકૃતં વેશ્મ પ્રવિશ્ય સુખમેધતે ॥ ૧૫॥

એકો નારાયણો દેવઃ પૂર્વસૃષ્ટં સ્વમાયયા ।
સંહૃત્ય કાલકલયા કલ્પાન્ત ઇદમીશ્વરઃ ।
એક એવાદ્વિતીયોઽભૂદાત્માધારોઽખિલાશ્રયઃ ॥ ૧૬॥

કાલેનાત્માનુભાવેન સામ્યં નીતાસુ શક્તિષુ ।
સત્ત્વાદિષ્વાદિપુરુષઃ પ્રધાનપુરુષેશ્વરઃ ॥ ૧૭॥

પરાવરાણાં પરમ આસ્તે કૈવલ્યસંજ્ઞિતઃ ।
કેવલાનુભવાનન્દસન્દોહો નિરુપાધિકઃ ॥ ૧૮॥

કેવલાત્માનુભાવેન સ્વમાયાં ત્રિગુણાત્મિકામ્ ।
સઙ્ક્ષોભયન્ સૃજત્યાદૌ તયા સૂત્રમરિન્દમ ॥ ૧૯॥

તામાહુસ્ત્રિગુણવ્યક્તિં સૃજન્તીં વિશ્વતોમુખમ્ ।
યસ્મિન્ પ્રોતમિદં વિશ્વં યેન સંસરતે પુમાન્ ॥ ૨૦॥

યથોર્ણનાભિર્હૃદયાદૂર્ણાં સન્તત્ય વક્ત્રતઃ ।
તયા વિહૃત્ય ભૂયસ્તાં ગ્રસત્યેવં મહેશ્વરઃ ॥ ૨૧॥

યત્ર યત્ર મનો દેહી ધારયેત્સકલં ધિયા ।
સ્નેહાદ્દ્વેષાદ્ભયાદ્વાપિ યાતિ તત્તત્સ્વરૂપતામ્ ॥ ૨૨॥

કીટઃ પેશસ્કૃતં ધ્યાયન્ કુડ્યાં તેન પ્રવેશિતઃ ।
યાતિ તત્સાત્મતાં રાજન્ પૂર્વરૂપમસન્ત્યજન્ ॥ ૨૩॥

એવં ગુરુભ્ય એતેભ્ય એષા મે શિક્ષિતા મતિઃ ।
સ્વાત્મોપશિક્ષિતાં બુદ્ધિં શૃણુ મે વદતઃ પ્રભો ॥ ૨૪॥

દેહો ગુરુર્મમ વિરક્તિવિવેકહેતુઃ
બિભ્રત્સ્મ સત્ત્વનિધનં સતતાર્ત્યુદર્કમ્ ।
તત્ત્વાન્યનેન વિમૃશામિ યથા તથાપિ
પારક્યમિત્યવસિતો વિચરામ્યસઙ્ગઃ ॥ ૨૫॥

જાયાઽઽત્મજાર્થપશુભૃત્યગૃહાપ્તવર્ગાન્
પુષ્ણાતિ યત્પ્રિયચિકીર્ષયા વિતન્વન્ ।
સ્વાન્તે સકૃચ્છ્રમવરુદ્ધધનઃ સ દેહઃ
સૃષ્ટ્વાસ્ય બીજમવસીદતિ વૃક્ષધર્મઃ ॥ ૨૬॥

જિહ્વૈકતોઽમુમપકર્ષતિ કર્હિ તર્ષા

શિશ્નોઽન્યતસ્ત્વગુદરં શ્રવણં કુતશ્ચિત્ ।
ઘ્રાણોઽન્યતશ્ચપલદૃક્ ક્વ ચ કર્મશક્તિઃ
બહ્વ્યઃ સપત્ન્ય ઇવ ગેહપતિં લુનન્તિ ॥ ૨૭॥

સૃષ્ટ્વા પુરાણિ વિવિધાન્યજયાઽઽત્મશક્ત્યા
વૃક્ષાન્ સરીસૃપપશૂન્ ખગદંશમત્સ્યાન્ ।
તૈસ્તૈરતુષ્ટહૃદયઃ પુરુષં વિધાય
બ્રહ્માવલોકધિષણં મુદમાપ દેવઃ ॥ ૨૮॥

લબ્ધ્વા સુદુર્લભમિદં બહુસમ્ભવાન્તે
માનુષ્યમર્થદમનિત્યમપીહ ધીરઃ ।
તૂર્ણં યતેત ન પતેદનુમૃત્યુ યાવ-
ન્નિઃશ્રેયસાય વિષયઃ ખલુ સર્વતઃ સ્યાત્ ॥ ૨૯॥

એવં સઞ્જાતવૈરાગ્યો વિજ્ઞાનાલોક આત્મનિ ।
વિચરામિ મહીમેતાં મુક્તસઙ્ગોઽનહઙ્કૃતિઃ ॥ ૩૦॥

ન હ્યેકસ્માદ્ગુરોર્જ્ઞાનં સુસ્થિરં સ્યાત્સુપુષ્કલમ્ ।
બ્રહ્મૈતદદ્વિતીયં વૈ ગીયતે બહુધર્ષિભિઃ ॥ ૩૧॥

શ્રીભગવાનુવાચ
ઇત્યુક્ત્વા સ યદું વિપ્રસ્તમામન્ત્ર્ય ગભીરધીઃ ।
વન્દિતોઽભ્યર્થિતો રાજ્ઞા યયૌ પ્રીતો યથાગતમ્ ॥ ૩૨॥

અવધૂતવચઃ શ્રુત્વા પૂર્વેષાં નઃ સ પૂર્વજઃ ।
સર્વસઙ્ગવિનિર્મુક્તઃ સમચિત્તો બભૂવ હ ॥ ૩૩॥

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયાં એકાદશસ્કન્ધે નવમોઽધ્યાયઃ ॥ ૯॥

(ઇતિ અવધૂતગીતમ્ ।)

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધે ભગવદુદ્ધવસંવાદે
નવમોઽધ્યાયઃ ॥ ૯॥

Encoded by Sunder Hattangadi

Portion of adhyAyas 7, 8 and 9 from Uddhavagita

*Avadhuta Gitam from Shrimad Bhagavata*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*